संप्राप्तिरूपे ।

अन्नाशीर्णात् प्रद्रुताः क्षोभयन्तः
कोष्ठं दोषा धातुसंघान् मलांश्च ।
नानावर्णं नैकशः सारयन्ति
शूलोपेतं षष्ठमेनं वदन्ति ॥

संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति ।
पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितं" ।
इति निदानं ॥
(चिकित्सा यथा,—
"न तु संग्रहणं दद्यात् पूर्व्वमामातीसारिणे ।
दोषाह्यादौ बध्यमाना जनयन्त्यामयान् बहून् ॥
शोथपाण्डामयप्लीहकुष्ठगुल्मोदरज्वरान् ।
दण्डकालसकाध्मानग्रहण्यर्शोगदांस्तथा ॥
क्षीणधातुबलार्त्तस्य बहुदोषोऽति निस्रुतः ।
आमोऽपि स्तम्भनीयः स्यात् पाचनान्मरणं भवेत्"
इति वैद्यकचक्रपाणिसंग्रहः ॥*॥
"अभया मस्तुना पिष्टा मधुशर्करयान्विता ।
आमातीसारं शमयेद् गुडामलकमेव च ॥
वत्सकं जीरके द्वे च दध्ना पिष्टन्तु दापयेत् ।
आमातिसारशमनं वस्तिशूलं नियच्छति" ॥
इति हारीतः ॥*॥ "तस्य रूपाणि विज्जलमामविसृतमवसादितं । रूक्षं द्रवं सशब्दमशब्दं वा विबद्धमूत्रवातमतिसार्य्यते पुरीषं वायुश्चान्तःकोष्ठस्य सशब्दशूलः तिर्य्यक् चरति विबद्ध इत्यामातिसारः" ।
"आमे परिणते यस्तु विबद्धमतिसार्य्यते ।
सशूलपिच्छमल्पाल्पं बहुशः सप्रवाहिकं ॥
तं मूलकानां यूषेण वदराणामथापि वा ।
उपोदकायाः क्षीरिण्या यवान्या वास्तुकस्य वा ॥
सुवर्च्चलायाश्चञ्चोर्व्वा शाकेनावल्गुजस्य वा ।
शट्याः कर्कारुकाणां वा जीवन्त्याश्चिर्भटस्य वा ॥
लोणीकायाः सपाठाया शुष्कशाकेन वा पुनः ।
दधिदाड़िमसिद्धेन बहुस्नेहेन भोजयेत्" ॥
इति चरकः ॥)

आमात्यः, त्रि, (अमात्य एव स्वार्थे अण् ।) अमात्यः । मन्त्री । इति द्विरूपकोषः ॥ बलाध्यक्षः ।

आमानस्यं, क्ली, (न प्रशस्तं मानसं यस्य सः अमानसस्तस्य भावः । अमानस + ष्यञ् ।) आमनस्यं । पीड़ा । दुःखं । इति शब्दरत्नावली ॥

आमान्नं, क्ली, (आमञ्च तत् अन्नञ्चेति कर्म्मधारयः ।) अपक्वान्नं । काँचाचाउल इति भाषा । तद्दानमन्त्रो यथा,—
"आमान्नं ते प्रयच्छामि फलताम्बूलसंयुतं ।
सघृतं परमं दिव्यं मया भक्त्या निवेदितं" ॥
इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥*॥ बलात् चाण्डालादिस्वामिकापक्वान्नभोजनप्रायश्चित्तं यथा । चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् सिद्धं भुक्त्वा पराकः । इति बलाद्भोजनविषयं । इति प्रायश्चित्तविवेकः ॥ त्रिरात्रमामान्नविषयं । परञ्च सिद्धमित्युक्तेः । पराकमाह मनुः ।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः" ॥
"तेनाचामान्ने सिद्धान्नप्रायश्चित्ततुरीयभागविधानादज्ञानादावपि तत्तुरीयकल्पना इति" । इति प्रायश्चित्ततत्त्वं ॥*॥ आमान्नदारा कर्त्तव्यश्राद्धानि । यथा,—
"आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा ।
आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि" ॥
इति श्राद्धतत्त्वधृतप्रचेतोवचनं ॥ अपि च । योगिनीतन्त्रे ।
"निरग्नेरामश्राद्धे तु अन्नं न चालयेत् क्वचित् ।
वृद्धौ च चालयेदन्नं संक्रमे ग्रहणेषु च" ॥
इति तिथ्यादितत्त्वम् ॥*॥

आमाशयः, पुं, (आमस्य आशयः षष्ठीतत्पुरुषः ।) अपक्वस्थानं । तत्तु नाभिस्तनयोर्म्मध्यभागः । इति शब्दचन्द्रिका ॥ (यथा महाभारते,—
"पक्वाशयस्त्वधोनाभ्यामूर्द्ध्वमामाशयः स्थितः" ।
यथा च सुश्रुते,—
"पक्वामाशययोर्मध्ये शिराप्रभवा नाभिर्नाम" ॥*॥
"नाभिस्तनान्तरं जन्तोराहुरामाशयं बुधाः" ।
"आमाशयस्तु तदधः" इति भावप्रकाशः ॥
"तत्रामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्व्विधस्याहारस्याधारः" । "आमाशयः श्लेष्मणः" । इति सुश्रुतः ॥)

आमिक्षा, स्त्री, (आमिष्यते मिषु सेचने बाहुलकात् सक् ।) शृतोष्णदुग्धे दधियोगसम्भवा या । क्षीरसा इति ख्याता । छाना इति केचित् । इत्यमरः ॥ तत्पर्य्यायः । दधिकूर्च्चिका २ पयस्या ३ क्षीरसन्तानिका ४ । इति राजवल्लभादयः ॥ ("ग्राहिणी वातला रूक्षा दुर्ज्जरा तक्रकूर्च्चिका" । इति सुश्रुतः अत्र हि तक्रकूर्च्चिका शब्देनामिक्षोच्यते इति पर्य्यायान्तरदृष्टत्वात् ॥)

आमिषं, क्ली, पुं, (आमिष्यते भुज्यते मिष् सेवने घञ् संज्ञापूर्व्वकत्वान्न गुणः ।) मांसं । इत्यमरः ॥ भोग्यवस्तु । सम्भोगः । उत्कोचः । इति मेदिनी ॥ सुन्दराकाररूपादि । लोभसञ्चयः । इति हेमचन्द्रः ॥ लाभः । कामगुणः । रूपं । भोजनं । इति हारावली ॥

आमिषप्रियः, पुं, (आमिषं प्रियं यस्य सः ।) कङ्कपक्षी । इति राजनिर्घण्टः ॥ मांसाभिलाषिणि त्रि ॥

आमिषाशी, न्, त्रि, (आमिषं अश्नाति आमिष + अश् + णिनि ।) मत्स्यमांसभोजनशीलः । तत्पर्य्यायः । शौष्कलः २ । इत्यमरः ॥

आमिषी, स्त्री, (आमिषवदाकारोऽस्त्यस्या जटायामिति अर्श आदित्वादच् गौरादित्वात् ङीष् च ।) मिषी । जटामांसी । इति केचित् । इत्यमरटीकायां भरतः ॥

आमीक्षा, स्त्री, (आमिष्यते, मिषु सेचने बाहुलकात् सक् ।) आमिक्षा । आवर्त्तिते तप्ते क्षीरे दधियोगात् या वटिकाकारा विकृतिर्जायते सा । इति पुरुषोत्तमः ॥

आमुक्तः, त्रि, (आङ् + मुच् + क्तः ।) पिनद्धः । परिहितवस्त्रादिः । इत्यमरः ॥ परिहितकवचव्यक्तिः ॥

आमुपः, पुं, (आम + वप् + क ।) कण्टकयुक्तवंशविशेषः । इति शब्दचन्द्रिका ॥ वेउड़वाँश । इति ख्यातः ।

आमुष्यायणः, त्रि, (अमुष्य अपत्यम् + फक् । अलुक् ।) ख्यातवंशोद्भवः । सत्कुलजातः । इति त्रिकाण्डशेषः ॥

आमूलं, क्ली, (मूलपर्य्यन्तं आमूलं । अव्ययीभावः ।) मूलपर्य्यन्तं ॥ (प्रारम्भावधि । यथा, शाकुन्तले ।)
"आमूलशुद्धसन्तति कुलमेतत् पौरवं प्रजाबन्धे" ।)

आमोदः, पुं, (आङ् + मुद + घञ् ।) अतिदूरगामिगन्धः । इत्यमरः ॥ गन्धः । हर्षः । इति मेदिनी ॥ समाहृद्गन्धः । इति शब्दरत्नावली । (यथा रघुवंशे । १।४३ ।
"आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम्" ।)

आमोदनं, क्ली, (आङ् + मुद + ल्युट् ।) आमोदकरणं । हर्षणं । प्रीणनं । आनन्दनं ।

आमोदितः, त्रि, (आ + मुद + णिच् + क्त । यद्वा आमोदः सञ्जातोऽस्य तारकादित्वादितच् ।) आनन्दितः । सुगन्धितः । सद्गन्धयुक्तः । यथा,—
"पारिजातप्रसूनोत्थगन्धामोदितदिङ्मुखे" ।
इति शिवरात्रिव्रतकथा ॥ आनन्दितः । आमोदशब्दादितप्रत्ययेन निष्पन्नः ॥

आमोदी, [न्] त्रि, (आमोद + णिनि ।) मुखवासनः । इत्यमरः ॥ कर्पूरादिवटिकाकृतमुखगन्धः । इति सारसुन्दरी ॥ मुखवासनवटिकादिः । आमोदयुक्तः कर्पूरादिरामोदी । इति भरतः ॥ नानाद्रव्यरचित एकैकश एव वा कर्पूरादिभिर्मुखोपयोग्यमुखवासनवटिकादिः । इति सर्व्वस्वं । गन्धयुक्तः । हर्षविशिष्टः ॥ (यथा भर्तृहरिः ।
"नवकुटजकदम्बामोदिनो गन्धवाहाः" ।)

आम्नायः, पुं, (आङ् + म्ना + घञ् + युक् ।) श्रुतिः । वेदः । (यथा महावीरचरिते ।
"तृतीयो ह्येष मेध्योऽमिराम्नायः पञ्चमोऽथवा" ।
उत्तरचरिते ।
"समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः" ।)
संप्रदायः । गुरुपरम्पराप्राप्तोपदेश इति यावत् ॥ इत्यमरः ॥ निगमः । उपदेशः । इति मेदिनी ॥ कुलं । आगमः । इति हेमचन्द्रः ॥ कुलक्रमः । इति शब्दरत्नावली ॥ (उपदेशः, शिक्षादानं, तन्त्रशास्त्रं, अभ्यासः, आम्रेडनं, आलोचनं ।)

आम्बिकेयः, पुं, (अम्बिकाया अपत्यं स्त्रीभ्यो ढक् ।) धृतराष्ट्रो राजा । इति त्रिकाण्डशेषः ॥ (यथा महाभारते ।
"परं श्रेयः पाण्डवेया मयोक्तं
न मे तच्च श्रुतवानाम्बिकेयः" ।)
कार्त्तिकेयः ।

आम्रः, पुं, (अम्यते अम गत्यादौ अमितभ्योदीर्घश्चेति रक् दीर्घश्च ।) फलवृक्षविशेषः । आम आँब इति भाषा । तत्पर्य्यायः । चूतः २ रसालः ३ । अतिसौरभश्चेत् सहकारः ४ । इत्यमरः ॥ कामशरः । कामवल्लभः ६ कामाङ्गः ७ कीरेष्टः ८ माधवद्रुमः ९ भृङ्गाभीष्टः १० सीधुरसः ११ मधूली १२